Graha Basic Mantra’s

July 2020

Surya

सूर्य मन्त्र –

ॐ आकृष्णेन रजसाव्वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सवितारथेनादेवो यातिभुवनानिपश्यन् ॥१ ॥

शिव –

ॐ त्र्यम्बकं यजामहे सुगंधिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॥
ॐ त्र्यम्बकं यजामहे सुगंधिं पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥१ ॥

अग्नि –

अग्निं दूतंपुरोदधे हव्यवाह मुपब्रुवे।
देवाँ२ ऽआसादयादिह ॥१ ॥

अग्नि –

सनः पितेवसूनवेग्नेसूपायनोभव ।
सचस्वानः स्वस्तये ॥१ ॥

इन्द्र –

ॐ त्रातारमिंद्र मवितारमिंद्र ठ हवेहवे सुहव ठ शूरमिंद्रम् ।
ह्वयामि शक्रम्पुरुहूतमिंद्र ॐ स्वस्तिनो मघवाधात्विंद्रः ॥१ ॥

Chandra

चन्द्र मन्त्र -

ॐ इमंदेवाऽअसपत्नठं.सुवद्धम्महतेक्षत्राय महते ज्यैष्ठ्याय
महते जानराज्ज्यायेंद्रस्येंद्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै
व्विशऽएषवोमी राजासोमोस्माकं ब्राह्मणाना ँ राजा ।।२ ।।

उमा -

श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे ।पार्श्वेनक्षत्राणि रूपमश्विनौ
व्यात्तम् ।इष्णन्निषाणा मुंमऽइषाण सर्वलोकं ऽइषाण ।।२ ।।

वायु -

ॐ आनोनियुद्भिः शतिनीभिरध्वर ठं सहस्त्रिणीभिरुपयाहि यज्ञम्।
वायो अस्मिन्त्सवने मादयस्व यूयं पातस्वस्तिभिः सदानः ।।६ ।।

आपः -

अप्स्वग्ने सधिष्ट वसौषधी रनुरुद्ध्यसे।
गर्भेसञ्जायसे पुनः ।।२ ।।

आपः -

अपोअद्यान्वचारिष ठं रसेन समसृक्ष्महि ।
पयस्वानग्नऽआगमन्तमास ठं सृजवर्चसाप्रजया च धनेन च ।।२ ।।

Kuja

मङ्गल मन्त्र –

ॐ अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ।
अपा ँ रेता ँ सिजिन्वति ॥३॥

ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुतवा पुरीषात् ।
श्येनस्यपक्षा हरिणस्यबाहू उपस्तुत्यं महिजातंतेऽअर्वन् ॥३॥

यम –

ॐ सुगन्नु पंथां प्रदिशन्न एहि ज्योतिष्मद्धेह्यजरन्न आयुः ।
अपैतुमृत्युरमृतंम आगा द्वैवस्वतो नो अभयं कृणोतु ॥३॥

धरा –

स्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छानः शर्म सप्रथाः ॥३॥

धरा –

चिदसि तया देवतयाङ्गिरस्वद् ध्रुवासीद ।
परिचिदसितया देवतयाङ्गिरस्वद् ध्रुवासीद ॥३॥

Budha

बुध मन्त्र -

ॐ उद्बुध्यस्वाग्नेप्रति जागृहित्वमिष्टा पूर्तेसर्ठ. सृजेथा मयञ्च।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् विश्वेदेवा यजमानश्चसीदत ॥४॥

विष्णु -

ॐ विष्णोरराटमसि विष्णणोः श्नप्त्रेस्थो विष्णणोः स्यूरसि विष्णो र्ध्रुवोसि।वैष्णवमसि विष्णवेत्वा ॥४॥

कुबेर -

ॐ वय ठ सोमव्रते तव मनस्तनूषु विभ्रत: प्रजावंत सचेमहि ॥७॥

विष्णु -

ॐ इदं विष्णु र्विचक्रमे त्रेधानिदधेपदम्।
समूढमस्यपा ४ सुरे स्वाहा॥४॥

विष्णु -

ॐ इदं विष्णु र्विचक्रमे त्रेधानिदधेपदम्।
समूढमस्यपा ४ सुरे स्वाहा॥४॥

Brihaspati

बृहस्पति मन्त्र –

ॐ बृहस्पतेऽअतियदर्यो ऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु।
यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहिचित्रम् ॥५॥

ब्रह्मा –

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे
राजन्यः शूर इषव्योति व्याधी महारथो जायतां दोग्ध्री
धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः।
सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे
निकामेनः पर्जन्योवर्षतु फलवत्यो न ओषधयः
पच्यन्तां योगक्षेमो नः कल्पताम् ॥५॥

इन्द्र –

महाँ२ ऽइन्द्रो वज्रहस्तः षोडशी शर्मयच्छतु ।
हन्तुपाप्मानं योस्मान्द्वेष्टि ॥५॥

इन्द्र –

इन्द्र ऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतुसोमः।
देवसेनानामभि भञ्जतीनाञ्जयन्ती नाम्मरुतो यन्त्वग्रम् ॥५॥

महेश्वर –

ॐ तमीशानं जगतस्तस्थुषस्पतिंधियञ्जिन्व मवसे हूमहेवयम् ।
पूषानो यथा वेदसा मससद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥८॥

Shukra

शुक्र मन्त्र –

ॐ अन्नात्परिस्त्रुतोरसं ब्रह्मणाव्व्यपिबत् क्षत्रम्पयः
सोमम्प्रजापतिः । ऋतेनसत्यमिंद्रियंव्विपान ठं. शक्रमन्धस
ऽइंद्रस्येंद्रिय मिदम्पयोमृतम्मधु ॥६॥

इन्द्र –

सजोषा इन्द्र सगणो मरुद्भिः सोमंपिववृत्रहा शूर विद्वान् ।
जहि शत्रुँ३ रपमृधोनुदस्वाथाभयं कृणुहि विश्वतोनः ॥६॥

अग्नि –

ॐ त्वन्नो ऽअग्नेतव देव पायुभिर्मघोनो रक्षतन्वश्चवंद्य ।
त्रातातोकस्यतनये गवामस्य निमेष ठंरक्षमाणस्तवव्रते ॥२॥

इन्द्राणि –

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च ।
शुक्रश्च ऽऋतपाश्चात्य ठ हः ॥६॥

इन्द्राणी –

इन्द्रन्दैवी र्विशोमरुतोनुवर्त्मानो भवन्यथेन्द्रन्दैवी
र्विशोमरुतोनुवर्त्मानोभवन् । एवमिमँ यजमानन्दैवीश्च
विशोमानुषीश्चानुवर्त्मानो भवन्तु॥६॥

Shani

शनि मन्त्र –

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ।
शंय्योरभिस्त्रवन्तुनः ॥७॥

यम –

यमायत्वा मखायत्वा सूर्यस्य त्वा तपसे ।
देवस्त्वा सविता मद्धानक्तु पृथिव्याः स ꣳ
स्पृशस्पाहि अर्चिरसि शोचिरसि तपोसि ॥७॥

वरुण –

ॐ तत्वायामि ब्रह्मणा वंदमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणे हवोध्युरुश ठ समान आयुः प्रमोषीः ॥५॥

प्रजापति –

ॐ प्रजापतेनत्व देतान्यन्यो विश्वारूपाणि परिताबभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तुवय ꣳ स्याम पतयोरयीणाम् ॥७॥

प्रजापति –

प्रजापतेनत्वदेतान्यन्यो विश्वारूपाणि परिताबभूव ।
यत्कामास्ते जुहुमस्तन्नो ऽअस्त्वयममुष्यपिता
सावस्यपितावय ठ स्यामपतयोरयीणा ꣳ स्वाहा।
रुद्रयत्तेक्रिविपरंनामतस्मिन् हुतमस्यमेष्टमासि स्वाहा ॥७॥

Rahu

राहु मन्त्र –

ॐ कया नश्चित्रऽआभुवदूती सदावृधःसखा ।
कयाशचिष्ठयावृता ॥८॥

काल –

कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि ।
समापो ऽअद्भिरग्मत समोषधीभिरोषधीः ॥८॥

नैऋति –

ॐ असुन्वंतम यजमान मिच्छस्तेनस्येत्यामन्विहितस्करस्य ।
अन्य मस्मदिच्छसात ऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥४॥

पन्नगाः –

आयङ्गौः पृश्निरक्रमीद सदन्मातरम्पुरः ।
पितरञ्च प्रयन्त्स्वः ॥८॥

सर्प –

नमोस्तु सर्पेभ्यो ये के च पृथिवी मनु ।
ये ऽअन्तरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः ॥८॥

Ketu

केतु मन्त्र –

ॐ केतुं कृण्वन्न केतवे पेशोमर्य्याऽअपेशसे ।
समुषद्धि रजायथा: ॥१ ॥

चित्रगुप्त –

चित्रावसो स्वस्तिते पारमशीय ॥१ ॥

ब्रह्मा –

ॐ अस्मेरुद्रा मेहनापर्वतासो वृत्रहत्ये भरहूतौ सजोषा: ।
य: शर्ठसतेस्तुवतेधायि वज्र इंद्र ज्येष्ठा अस्माँ२ अवंतु देवा:॥१॥

अनन्त –

ॐ स्योना पृथिविनोभवा नृक्षरानिवेशनी । यच्छान: शर्मसप्रथा: ।

ब्रह्मा –

ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमत: सुरुचोवेनऽआव: ।
सबुध्न्याऽउपमाऽअस्यविष्ठा: सतश्चयोनिम सतश्चविव: ॥१ ॥

ब्रह्मा –

ब्रह्मजज्ञानम्प्रथमं पुरस्ता द्विसीमत: सुरुचोवेनऽआव: ।
सबुध्न्या ऽउपमा ऽअस्य विष्ठा: सतश्च योनिमसतश्चविव: ॥१ ॥

Other than this planets have many Strotra's, Kavacha, Hridayam etc. attached to them, we will study them one after another, in this series of Vedic Remedies for planets.

Remember remedy is not a child's play.

There are also many normal Sukta's etc. also which needs to be done beforehand such as Pavamana Suktam, Shri Suktam etc.